International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 281-285
© 2019 IJSR
www.anantaajournal.com
Received: 19-05-2019
Accepted: 21-06-2019

**मृत्युञ्जयः गराँइ**
शोधछात्रः, भाषाभवनम्,
विश्वभारती, शान्तिनिकेतनम्,
पश्चिम बंगाल, भारत

**Correspondence**
**मृत्युञ्जयः गराँइ**
शोधछात्रः, भाषाभवनम्,
विश्वभारती, शान्तिनिकेतनम्,
पश्चिम बंगाल, भारत

# शिशुपालवधे काव्यतत्त्वालोचनम्

**मृत्युञ्जयः गराँइ**

**सारांश**

कविकर्मणः काव्यस्य स्वरूप-कारण-प्रयोजन-रीति-ध्वनि-रसादीनामालोचनमेव काव्यतत्त्वा-लोचनम्। काव्यतत्त्वालोचनं न केवलं अलंकारशास्त्रे परिप्राप्यते अपि तु महाकवीनां तदीयकाव्येषु एव दृश्यते। महाकविमाघप्रणीते शिशुपालवधमहाकाव्ये माघकाव्ये वा काव्यतत्त्वस्य बहुविधाः सिद्धान्ताः समुपन्यस्ताः। अत्र काव्यस्य स्वरूप-शब्दवैचित्र्य-अलंकार-गुण-रस-चमत्कारित्व-नाटकीयवैशिष्ट्यादयः बहुविधाः विषयाः पर्यालोचिताः। लेखेऽस्मिन् विषयोऽयं सम्यकतया उपस्थाप्यते।

**कूटशब्दः** माघकाव्यम्, पञ्चमहाकाव्यानि, अलंकारशास्त्रम्, गुणः, रसः, सहृदयः, रमणीयता, विभावः, अनुभावः, रतिः, काव्यात्मा, नाटकम्, आङ्गिकाभिनयः

**प्रस्तावना**

"संसारविषवृक्षस्य द्वे एव मधुरे फले ।
काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह ।।" १

विषवृक्षसदृशोऽयमखिलः संसारः। संसारेऽस्मिन् दृश्यते तावद् द्विविधं मधुरं फलम्। तत्र काव्यामृतरसास्वादनं खलु परं फलमिति मन्यते विद्वद्भिः। काव्यं प्रति मनुष्याणामाकर्षणमेव चिरन्तनम्। सुप्राचीनकालादेव काव्यामृतरसधारायां हि समाकृष्टाः मनुष्याः। अतः कल्पलतेव काव्यालोचना सुमधुरामृततुल्या। यथोक्तं कविना-

"सङ्गीतमथ साहित्यं सरस्वत्या स्तनद्वयम् ।
एकमापातमधुरमन्यदालोचनाऽमृतम् ।।" २

अमृतमयस्यास्य कविकर्मणः काव्यस्य स्वरूप-कारण-प्रयोजन-रीति-ध्वनि-रसादीनां सम्यगा-लोचना तावद् काव्यतत्त्वालोचना। आलोचनेयं समृद्धतया सम्पूर्णतया च अलंकारशास्त्रेषु एव परिप्राप्यते। संस्कृतवाङ्मये अलंकारशास्त्रस्यास्य दृश्यते खलु महत् स्थानम्। आलंकारिक-राजशेखरस्य मते, अलंकारशास्त्रमिदं सप्तमवेदाङ्गरूपेण स्वीकृतम्। अतः काव्यमीमांसा-ग्रन्थे तेनोक्तम्-

"उपकारकत्वादलंकारः सप्तममङ्गमिति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः।" [३]

काव्यतत्त्वालोचनायां सम्पृक्ता अलंकारशास्त्रिया व्याख्यानरीतिः सुप्राचीनकालादेव साम्प्रतिककालं यावत् प्रवहनशीला विराजते संस्कृतभाषायाम्। धारायामस्यां भामह-दण्डी-वामन-उद्भट-रुद्रट-आनन्दवर्धन-कुन्तक-धनञ्जय-मम्मट-विश्वनाथ-जगन्नाथादय आचार्याः प्रमुखालंकारिकाः। आलंकारिकाणामेषां स्वकीयग्रन्थेषु काव्यतत्त्वस्य बहुविधाः सिद्धान्ताः समुपन्यस्ताः। न केवलमेतद्, अपि तु प्रथितयशसां कवीनां काव्येषु एव कुत्रचित् कुत्रचित् काव्यतत्त्वालोचना अस्फुटरूपेण अनुमीयते। महाकवि-भारवि-कालिदास-माघ-श्रीहर्ष-भट्टि-प्रमुखाणां महाकवीनां तदीयकाव्येषु बहुषु स्थलेषु एवं काव्यतत्त्वचिन्तनं समुपनिबद्धम्। तत्र माघकवेः शिशुपालवध-महाकाव्यस्य माघकाव्यस्य वा विशिष्टमेकं स्थानं विद्यते इति मन्यते विपश्चिद्भिः। संस्कृतालंकृतपञ्चमहाकाव्येषु अत्युत्कृष्टमेकं महाकाव्यं तावद् शिशुपालवधमिति। सुकविकीर्तिलाभस्य दुर्निवारप्रचेष्टायां विंशति सर्गेषु महाकविमाघेन प्रणीतमिदं काव्यम्। महाकाव्येऽस्मिन् मूलाख्यानवर्णनेन सह प्रसङ्गानुसारेण काव्यतत्त्व-दर्शन-व्याकरण-योग-कामार्थ-शास्त्रादीनां विचित्रवर्णनमपि मनोज्ञरूपेण परिप्राप्यते। अलंकारतत्त्वविवेचने काव्यतत्त्वविवेचने वा महाकवि-माघस्य कृतिः विद्वद्भिः भूयसी प्रशंसिता। वाङ्मधुरकाव्यस्य स्वरूप-शब्दवैचित्र्य-अलंकार-गुण-रस-चमत्कारित्व-नाटकीयवैशिष्ट्यादयः बहुविधाः विषयाः सम्यग्-रूपेणात्र पर्यालोचिताः। एवमालोचना माघस्य आलंकारिकप्रतिभायाः निदर्शनरूपेण समाकर्षति सर्वान् सहृदयान्।

## १. काव्यस्वरूपम्

काव्यस्य लक्षण-प्रसङ्गे 'नासौ मुनिर्यस्य मतं न भिन्नम्' इति वाक्यं सर्वदा श्रुयते। अर्थात् काव्यस्वरूपविषयेऽस्ति पण्डिताणां महती विप्रतिपत्तिः। प्रायेण सर्वैरेवालंकारिकैः परस्परस्पर्द्धया स्वाभिमतानुसारेण काव्यस्य लक्षणवाक्यानि प्रणीतानि। लक्षणानामेषां तु पक्षद्वयं स्वीक्रियते। केषाञ्चिन्मते शब्दार्थौ सहितौ काव्यमिति प्रथमपक्षः। भामह-वामन-रुद्रट-मम्मट-कुन्तक-हेमचन्द्रादय आलंकारिकाः मतस्यास्य समर्थकाः। अपरं तु रमणीयार्थज्ञापकः शब्दरेव काव्यमिति द्वितीयपक्षस्याभिमतम्। धारायामस्यां अग्निपुराण-दण्डी-जगन्नाथा-दीनामालंकारिकाणां नाम सश्रद्धमुल्लिख्यते।

श्रीमन्माघ-कृते शिशुपालवधे महाकाव्ये प्रतिपाद्यते तावद् काव्यस्य महत् स्वरूपमेकम्। तत्र महाकविना माघेनोक्तम्-

"शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।" [४]

अर्थात् शब्दार्थद्वयेन सन्मिलितरूपमेव काव्यं, न केवलः शब्दोऽर्थो वेति माघकवेराशयः। पुनश्च कवित्वशक्त्याः पराकाष्ठा खलु अनुज्झितार्थसम्बन्धरिति माघस्याभिमतम्। अतः शिशुपालवधे तेनोक्तम् –

"अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः।" [५]

काव्यस्वरूपविषये महाकवि-माघस्य अनेन मतेन सह भामह-वामन-रुद्रट-मम्मटादीना-मालंकारिकाणामस्ति प्रवलमैक्यमत्यम्।

## २. रमणीयतास्वरूपम्

अलंकारशास्त्रे रमणीयतायाः विशिष्टमेकं स्थानं दृश्यते तावत् संस्कृतभाषायाम्। काव्यस्वरूप-प्रसङ्गे विविधालंकारिकैः इयं पर्यालोचिता। तेषामाचार्यजगन्नाथस्याभिमतं सश्रद्धमुल्लिख्यते। काव्यस्वरूप-विषये तेनोक्तम् –

"रमणीयार्थप्रतिपादकः शब्दः काव्यम।" [६]

अर्थात् रमणीयार्थज्ञापकः शब्दरेव काव्यमिति। पुनश्चात्र रमणीयार्थस्यार्थ-प्रसङ्गे तेनोक्तम् –

"रमणीयता च लोकत्तराहलादजनकज्ञानगोचरता।" [७]

शिशुपालवधेऽपि रमणीयताया अत्युज्ज्वलमेकं स्वरूपं माघेन प्रदत्तम्। तत्र तेनोक्तम् –

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।" [८]

अर्थात् प्रतिक्षणमपूर्ववद्भावमुपैति यत् तत्रवत्वोपगमनमेव रमणीयतायाः स्वरूपमिति माघकवेरभिप्रायः।

## ३. अलंकारविवेचनम्

काव्यशोभावर्धकधर्मरूपेण अलंकाराः काव्ये सुतरामपेक्ष्यन्ते। सहृदयानां चेतसि यथा सम्यक् रसवोधो

जायते तदर्थं महाकाव्यादीनां पद्येषु दृश्यन्ते तावद् बहुविधारलंकाराः। अलंकारं विना कविवाङ्-निर्मिति-काव्यं निर्भूषनं वनितानननमिव प्रतिभाति। यथोक्तं भामहेन -

"न कान्तमपि निर्भूषं विभाति वनिताननम् ।" ९

अतः काव्ये अलंकाराणां महती भूमिकाऽस्ति। अलंकारशास्त्रदिशा अलंकाराणामेषां द्विविधं भेदं सुप्रचलितम्। तद् यथा - शब्दालंकारः, अर्थालंकारश्चेति। एवमुभयालंकाराणां प्रयोगः काव्ये सम्यक्-तया परिलक्ष्यते। अलंकाराणां विचित्रप्रयोगः हि माघकाव्यस्यान्यतमाकर्षणम्। अतिशयोक्ति-अलंकारचिन्तने माघस्य कृतिः सर्वैः प्रशंसिता। अतिशयोक्तिः काव्यं न दूष्यति। किं बहुना, प्रौढ़ोक्तिरूपेण इयं सर्वत्र स्तूता। यथोक्तं प्रतापरुद्रीये –

"विषयस्यानुपादानाद्विषय्युपनिबध्यते ।
यत्र सातिशयोक्तिः स्यात् कवेः प्रौढ़ोक्तिजीविता ।।" १०

सिद्धान्तेऽस्मिनालंकारिकाणां माघकवेरपि सन्मतिरस्ति। शिशुपालवधस्य मनोज्ञ-पद्यमिदमत्र उल्लिख्यते –

"मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृङ्गैः ।
भवन्ति नोद्यामगिरां कवीनामुच्छ्रायसौन्दर्यगुणा मृषोद्याः ।।" ११

**४. गुणविवेचनम्**

काव्यस्योपादेयधर्मरूपेण गुणस्य महती भूमिका सर्वालंकारिकैः स्वीकृता। श्लेष-प्रसादादि दशगुणा अलंकारशास्त्रे सम्यकतया पर्यालोचिताः। बीजं यथा शाखा-पल्लव-पुष्प-फल-समन्वितं वृक्षं सृजति तथैव कविगतोऽपि रसः गुणालंकारादिमयं काव्यं प्रकाशयति। रसस्य सम्यगभिव्यक्ति-प्रदर्शनेऽस्ति अस्य महानुपयोगः। तथा चोक्तं मम्मटाचार्येण -

"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।" १२

ध्वनिकारेणापि अनुरूपमेव कथितम् -

"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।" १३

अर्थात् शोर्यादिवत् गुणा अपि काव्यात्मभूतं रसं सम्यकरूपेणोद्भाषयन्ति।
रसानुकूल्येन गुणानां ग्रहणं कविभिर्विधेयमित्यालंकारिकाणां सिद्धान्तेऽस्ति माघकवेरपि सन्मतिः। यथा माघकाव्ये तेनोक्तम् -

"तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः ।
नैकमोजः प्रसादो वा रसभावविदः कवेः ।।" १४

**५. रसतत्त्वम्**

काव्यात्मभूतपदार्थरूपेण अलंकारशास्त्रेऽस्ति रसस्य महदवदानम्। आचार्य-विश्वनाथस्य मते, काव्यस्यात्मा रसरिति। यथोक्तं साहित्यदर्पणे-

"वाक्यं रसात्मकं काव्यम् ।" १५

किं बहुना, रसेन विना कस्यचित् विषयस्यापि प्रतीति न सम्भवति। तथोक्तं भरतमुनिना –

"न हि रसादृते कश्चिदर्थः प्रवर्तते ।" १६

रसः खलु काव्यस्य मुख्योपजीव्य-विषयः। रसादेव भावाणां सम्यगभिव्यक्तिः भवति। अतः नाट्यशास्त्रे उच्यते –

"यथा बीजाद्भवेद्वृक्षो वृक्षात्पुष्पं फलं यथा ।
तथामूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।" १७

अस्य रसस्योत्पत्ति-विषये प्रवला विप्रतिपत्तिरस्ति आलंकारिकाणाम्। रसोत्पत्ति-विषये भरतमुनिना सम्यगुक्तम् -

"तत्र विभवानुभाव-व्यभिचारि-
संयोगाद्रसनिष्पत्तिः।" १८

उक्तिरियमलंकारशास्त्रे रससूत्ररूपेण सुप्रचलिता। रत्यादिस्थायिभावेन सह विभावानुभाव-व्यभिचारिभावानां संयोगाद्रसोत्पत्तिर्भवतीत्यालंकारिकाणामभिमतम्।
एतादृशं रसतत्त्वचिन्तनं माघकाव्येऽपि सम्यकतया परिदृष्टम्। रसोत्पत्ति-प्रसङ्गे माघेनापि अनुरूपमेवोक्तम् -

"स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा ।
रसस्यैकस्य भूयांशस्तथा नेतुर्महीभृतः ।।" १९

### ६. नाट्यतत्त्वम्

'काव्येषु नाटकं रम्यम्' - इति विद्वद्भिः कथितम् । नाटके दर्शनस्य श्रवणस्य च प्रतीतिः युगपदेव भवति । अतः वाङ्मय-काव्येषु नाटकमतीवोत्कृष्टतरम् । वामनाचार्येणापि उक्तमेवानुरपम् –

"सन्दर्भेषु दशरूपकं श्रेयः।" [२०]

नाट्यतत्त्वस्य सम्यगालोचना नाट्यशास्त्रे विस्तृततया परिप्राप्यते। आलोचनेयमुत्तरकाले सागरनन्दी-शारदातनय-विश्वनाथ-धनञ्जयादीनां ग्रन्थेषु संस्कृता संक्षेपिता च भवति। आलंकारिकाणामेषां तदीयग्रन्थेषु नाट्यकाव्यस्य बहुविधानि तत्त्वानि आलोचितानि।

नाटकीयवैशिष्ट्यमय-चिन्तनमपि माघकाव्ये सम्यकरूपेणावगम्यते। माघकविवरस्य मतेऽभिनय-काले भावप्रकाश आङ्गिक-वाचिक-मानसिकभेदेन त्रिधा भवति। नृत्यमपि कोमलम्, उद्धतश्चेति द्विधा भिद्यते। नाट्ये गीतमपि च प्रयोज्यमिति। अतश्चोक्तं तेन –

"अनवद्यवाद्यलयगामि कोमलं नवगीतमप्यनवगीततां दधत्।

स्फुटसात्त्विकाङ्गिकमनृत्यदुज्ज्वलं
सविलासलासिकविलासिनीजनः॥" [२१]

नाटके शृङ्गाराद्यङ्गिरसस्य रत्यादिस्थायिभावस्य संस्कृत-प्राकृतादि-भाषाभाषिणः कुशीलवस्य च प्रयोजनमस्तीति माघकवेः सिद्धान्तः। तथा च माघेनोक्तम् -

"स्वादयन्नसमनेकसंस्कृत-प्राकृतैरकृतपात्रसङ्करैः।
भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैः॥" [२२]

### उपसंहृति

"न स शब्दो न तद् वाच्यं न स न्यायो न सा कला ।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः ॥" [२३]

सत्यमेव, काव्यस्रष्टा-कवीनामस्ति सुमहान् भारः। सुकवीनां तदीयकाव्येषु विविध-शास्त्रज्ञानस्यात्युज्ज्वलकिरणद्यूतिः सर्वत्रैवानुभूयते। सुकाव्यै एव कवीनां महती ख्यातिः जगति सर्वत्र परिव्याप्ता । सुकाव्येषु माघकाव्यस्य प्रशस्यस्थानं विराजते संस्कृतभाषायाम्। यथोक्तम् -

"काव्येषु माघः कविकालिदासः।"

माघकाव्ये अलंकार-दर्शन-व्याकरण-आयुर्वेद-काम-अर्थ-कोषादिशास्त्राणां बहुविधाः सिद्धान्ताः पर्यालोचिताः। काव्यतत्त्व-चिन्तनेऽस्ति माघस्य महद् वैदुष्यम्। काव्यस्वरूप-रमणीयतासरूप-अलंकार-गुण-रस-नाट्यतत्त्वादीनां सिद्धान्ते आलंकारिकैः सह नास्ति तस्य विरोधः, अपि तु सादृश्यमस्ति प्रवलम्। किं बहुना, अलंकारशास्त्र-जातियं किमपि शास्त्रं तेन न प्रणीतम्, तथापि शास्त्रेऽस्मिन् तस्य विपुलं पाण्डित्यं समाकर्षति सर्वान् सहृदयान्। परिशेषे कविवरमाघस्य एवं काव्यतत्त्वचिन्तनं तु माघप्रतिभायाः केवलमांशिकग्रहणमात्रम्, न तु सम्पूर्णप्रकाशमिति वक्तुं शक्यते।

### पादटीका

१. हितेपदेशः १/२०३
२. मञ्जुनाथग्रन्थावलिः, द्वितीयभागे द्वितीयखण्डः, निबन्धा ललितनिबन्धश्च, पृ. २८७ ।
३. ३.सि.डि.दालाल सम्पादिता, काव्यमीमांसा, प्रथमाधिकरणे द्वितीयध्यायः, पृ. २ ।
४. शिशुपालवधम्, २/८६
५. शिशुपालवधम्, २/७३
६. रसगङ्गाधरः, १/१
७. रसगङ्गाधरः १/१, वृत्ति, द्र. ।
८. शिशुपालवधम्,४/१७
९. भामहकृतः काव्यालंकारः, १/१३
१०. प्रतापरुद्रीयम्, ८/१०५
११. शिशुपालवधम्, ४/१०
१२. काव्यप्रकाशः, ८/६६
१३. ध्वन्यालोकम्, २/६
१४. शिशुपालवधम्, २/८३
१५. साहित्यदर्पणः, १/३
१६. नाट्यशास्त्रम्, ६/३४
१७. नाट्यशास्त्रम्, ६/४२
१८. नाट्यशास्त्रम्, ६/३४
१९. शिशुपालवधम्, २/८७
२०. काव्यालंकारसूत्रवृत्तिः, १/३/३०
२१. शिशुपालवधम्, १३/६६
२२. शिशुपालवधम्, १४/५०
२३. भामहकृतः काव्यालंकारः, ५/४ ।

## परिशीलितग्रन्थसूची


१. .उपाध्याय, बलदेव, संस्कृत साहित्य का इतिहास, शारदा निकेतन, वाराणसी, १९८५ ।

२. काव्यादर्शः, कृष्णशर्मा-सम्पादितः, भाण्डारकर-प्राच्यविद्या-संशोधनमन्दिरम्, पुण्यपत्तनम्, द्वितीयावृत्तिः, १९७०, मुद्रितः।

३. काव्यमीमांसा, आचार्य-शेषराजशर्मा-रेग्मी-संशोधिता, चौखाम्वा-संस्कृत-संस्थानम्, वाराणसी, १९८३, मुद्रितः।

४. काव्यालंकारः, वटुकनाथशर्मणा बलदेव-उपाध्यायेन च सम्पादितः, चौखाम्वा-संस्कृत-संस्थानम्, वाराणसी, १९८१, मुद्रितः ।

५. काव्यालंकार-सूत्रवृत्तिः, नारायणराम-आचार्येण संशोधितः, मोतिलाल-बनारसी-दासः, दिल्ली, १९८३, मुद्रितः।

६. खाटुया, कार्तिकचन्द्रः, मल्लिनाथ-समीक्षा, संस्कृत-पुस्तक-भाण्डारः,कलिकाता, २००३, मुद्रितः।

७. दास, राजेन्द्रप्रसादः, वाल्मीकीय-रामायणे वैदिक-उपादान-समीक्षा, संस्कृत-वुक-डिपो, प्रथमप्रकाशः, २००६, मुद्रितः।

८. ध्वन्यालोकः, दूर्गाप्रसादसम्पादितः, निर्णयसागरमुद्रणालयः, मुम्वइ, तृतीयावृत्तिः, १९२८, मुद्रितः।

९. प्रतापरुद्रीयम्, वि.राघवाचार्य-सम्पादितः, मद्रनगरी, १९७०, मुद्रितः।

१०. शिशुपालवधम्, हरिदाससिद्धान्तवागीश-सम्पादितः, सिद्धान्तविद्यालयः, कलिकाता, १८८२ शकाव्दः, मुद्रितः।

११. Dasgupta, surendranath and S.K.Dey, A History of Sanskrit Literature, Vol.-1, Calcutta university, Kolkata, 1962 1st ed., print.

१२. Krishnamachariyar, M., A History of Clacical Sanskrit Literature, M.L.B.D., Delhi, 1974, print.